# Rasna

रास्ना युक्तरसा स्याच्छ्रेयस्या श्रेयसा रसा युक्ता ।
सुवहा सुगन्धमूला रस्या सा गन्धनाकुली चेति ॥ **(Aa ma)**

Rasna, yuktarasa, sreyasa, sreyasi, yukta, suvaha, sugandhamula, rasya and gandhanakuli are its synonyms.

रास्ना युक्तरसा रस्या सुवहा रसाना रसा ।
एलापर्णी च सुरसा सुगन्धा श्रोयसी तथा ॥ **(Bpn)**

Rasna, yukta rasa, rasya, suvaha, rasna, rasa, elaparni, surasa, sugandha, sroyasi are its synonyms.

विशेषाद्वातरोगघ्नी तैलादिषु नियोजिता ।
विषघ्नी श्वासकासघ्नी रास्ना हिक्कानिवारणी ॥ **(Mdn)**

Rasna specifically alleviates vataroga when used in the form of taila.
It also alleviates visha, svasa, kasa and hikka.

रास्नामपाचनी तिक्ता गुरूष्णा कफवातजित् ।
शोफश्वाससमीरास्रवातशूलोदरापहा ॥
कासज्वरविषार्शावातिकामयहिध्महृत् । **(Bpn)**

Rasna is tikta in rasa, guru in guna, usna in veerya, ama pacani, alleviates kapha and vata, cures sopha, svasa, samira, asra vata, sula, udara, kasa, jvara, visa, sita vata and hidhma.

रास्ना गुरुश्च तिक्तोष्णा विषवातास्रकासजित् ।

शोफकम्पोदरश्लेष्मशमन्यामस्य पाचनी ॥ **(Dhn)**

Rasna is tikta in rasa, guru in guna, usna in veerya, cures visha, vata, asra, kasa, sopha, kampa, udara, slesma and is ama pacana.

रास्ना तिक्ता गुरुश्चोष्णा पाचन्यामविनाशिनी ।
वातरक्तं विषं श्वासं कासं च विषमज्वरम् ॥
शोफं हिक्कां चामवातं कफं शूलं विनाशयेत् ।
ज्वरं कम्पं चोदरं च सर्वान् वातांश्च नाशयेत ॥ **(Sgn)**

Rasna is tikta in rasa, guru in guna, usna in veerya, pacana, destroys ama, cures vatarakta, visa, svasa, kasa, visamajvara, sopha, hikka, amavata, kapha, sula, jvara, kampa, udara and sarva vata.

रास्ना तिक्ता गुरूष्णामपाचनी कफपित्तहा ।
निहन्ति शोफवातास्रश्वासकासविषज्वरान् ॥
हिध्माशीतामवाताढ्या वातशूलोदरणि च । **(Kdn)**

Rasna is Tikta in rasa, guru in Guna, Usna in Potency, Ama pacani, Kapha Pitta hara, cures Sopha, Vata asra, Svasa, Kasa, Visha, Hidhma, Sita vata, Ama vata, Vata adhya, Vata sula and Udara.

रास्नोष्णा वातशोफामवातवातामयान् जयेत् । **(Sdn)**

Rasna is Usna in Potency, Vata-sopha-Amavata hara.

कुलञ्जो गन्धमूलश्च तीक्ष्णमूलः कुलञ्जनः ।
कुलञ्जः कटुतिक्तोष्णो दीपनो मुखदोषनुत् ॥ **(Rjn)**

Kulanja, Gandhamula, Tiksna mula, Kulanjana, Kulanja-Synonyms for Rasna.

It is Katu, Tikta in Rasa, Usna in potency, Dipana and Mukha dosha hara.

कुलिञ्जनं कटुस्तिक्तमुष्णं चाग्निप्रदीपनम् ।
रुच्यं स्वर्यं च हृद्यं च मुखकण्ठविशुद्धिकृत् ॥
मुखदोषं कफं श्वासं कासं वातं ध्रुवं जयेत् ।
बृहत्कुष्ठगुणैर्ज्ञेयं न्यूनमस्मादिति स्मृतम् ॥ **(Nir)**

Kulinjana is Katu, Tikta in Rasa, Usna in Potency, Agni pradipana, Rucyam, Svarya, Hrdya, Mukha-Kantha visuddhikara, cures Mukha dosha, Kapha, Svasa, Kasa, vata, Dhruva, Brhat Kustha which is Navina.

सुगन्धाप्युग्रन्धा च विशेषात्कफकासनुत् ।
सुस्वरत्वकरी रुच्या हृत्कण्ठमुखशोधनी ॥
स्थूलग्रन्थिः सुगन्धा स्यात् ततो हीनगुणा स्मृता ॥ **(Bpn)**

It is Sugandha and Ugra gandha specifically it reduces Kapha, Kasa, Susvara kara, Rucya, Hrt-Kantha-Mukha sodhani.

If it is bulbous and sweet smelling then it is inferior.